# DhvanyAlokah Udyotah 1

# ધ્વન્યાલોકઃ ઉદ્યોતઃ ૧

## Document Information

Text title : Dhvanyaloka Udyota 1

File name : dhvanyaloka1.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : January 4, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# ધ્વન્યાલોકઃ ઉદ્યોતઃ ૧

॥ પ્રથમઃ ઉદ્યોતઃ ॥

સ્વેચ્છાકેસરિણઃ સ્વચ્છસ્વચ્છાયાયાસિતેન્દવઃ ।
ત્રાયન્તાં વો મધુરિપોઃ પ્રપન્નાર્તિચ્છિદો નખાઃ ॥

કાવ્યસ્યાત્મા ધ્વનિરિતિ બુધૈર્યઃ સમામ્નાતપૂર્વ-
સ્તસ્યાભાવં જગદુરપરે ભાક્તમાહુસ્તમન્યે ।
કેચિદ્વાચામ્ સ્થિતમવિષયે તત્ત્વમૂચુસ્તદીયમ્
તેન બ્રૂમઃ સહૃદયમનઃપ્રીતયે તત્સ્વરૂપમ્ ॥ ૧॥

બુધૈઃ કાવ્યતત્ત્વવિદ્ભિઃ કાવ્યસ્યાત્મા ધ્વનિરિતિ સંજ્ઞિતઃ ,
પરમ્પરયા યઃ સમામ્નાતપૂર્વઃ સમ્યક્ આસમન્તાત્ મ્નાતઃ પ્રકટિતઃ ,
તસ્ય સહૃદયજનમનઃપ્રકાશમાનસ્યાપ્યભાવમન્યે જગદુઃ ।
તદભાવવાદિનાં ચામી વિકલ્પાઃ સમ્ભવન્તિ ।

તત્ર કેચિદાચક્ષીરન્ — શબ્દાર્થશરીરન્તાવત્કાવ્યમ્ ।
તત્ર ચ શબ્દગતાશ્ચારુત્વહેતવોઽનુપ્રાસાદયઃ પ્રસિદ્ધા
એવ । અર્થગતાશ્ચોપમાદયઃ । વર્ણસંઘટનાધર્માશ્ચ યે
માધુર્યાદયસ્તેઽપિ પ્રતીયન્તે । તદનતિરિક્તવૃત્તયો
વૃત્તયોઽપિ યાઃ કૈશ્ચિદુપનાગરિકાદ્યાઃ પ્રકાશિતાઃ , તા
અપિ ગતાઃ શ્રવણગોચરમ્ । રીતયશ્ચ વૈદર્ભીપ્રભૃતયઃ ।
તદ્વ્યતિરિક્તઃ કોઽયમ્ ધ્વનિર્નામેતિ ।

અન્યે બ્રૂયુઃ – નાસ્ત્યેવ ધ્વનિઃ । પ્રસિદ્ધપ્રસ્થાનવ્યતિરેકિણઃ
કાવ્યપ્રકારસ્ય કાવ્યત્વહાનેઃ સહૃદયહૃદયાહ્લાદિશબ્દાર્થ-
મયત્વમેવ કાવ્યલક્ષણમ્ । ન ચોક્તપ્રસ્થાનાતિરેકિણો માર્ગસ્ય
તત્સમ્ભવતિ । ન ચ તત્સમતાન્તઃપાતિનઃ સહૃદયાન્
કાંશ્ચિત્પરિકલ્પ્ય તત્પ્રસિદ્ધ્યા ધ્વનૌ કાવ્યવ્યપદેશઃ
પ્રવર્તિતોઽપિ સકલવિદ્વન્મનોગ્રાહિતામવલમ્બતે ।

પુનરપરે તસ્યાભાવમન્યથા કથયેયુઃ – ન સમ્ભવત્યેવ ધ્વનિર્નામાપૂર્વઃ કશ્ચિત્ । કામનીયકમનતિવર્તમાનસ્ય તસ્યોક્તેષ્વેવ ચારુત્વહેતુષ્વન્તર્ભાવાત્ । તેષામન્યતમસ્યૈવ વા અપૂર્વસમાખ્યા-માત્રકરણે યત્કિઞ્ચન કથનં સ્યાત્ ।

કિઞ્ચ વાગ્વિકલ્પાનામાનન્ત્યાત્ સમ્ભવત્યપિ વા કસ્મિંશ્ચિત્ કાવ્ય-લક્ષણવિધાયિભિઃ પ્રસિદ્ધૈરપ્રદર્શિતે પ્રકારલેશે ધ્વનિર્ધ્વનિરિતિ યદેતદલીકસહૃદયત્વભાવનામુકુલિતલોચનૈર્નૃત્યતે , તત્ર હેતું ન વિદ્મઃ । સહસ્રશો હિ મહાત્મભિરન્યૈરલઙ્કારપ્રકારાઃ પ્રકાશિતાઃ પ્રકાશ્યન્તે ચ । ન ચ તેષામેષા દશા શ્રૂયતે । તસ્માત્ પ્રવાદમાત્રં ધ્વનિઃ । ન ત્વસ્ય ક્ષોદક્ષમમ્ તત્ત્વમ્ કિંચિદપિ પ્રકાશયિતું શક્યમ્ । તથા ચાન્યેન કૃત એવાત્ર શ્લોકઃ —

યસ્મિન્નસ્તિ ન વસ્તુ કિંચન મનઃપ્રહ્લાદિ સાલઙ્કૃતિ
વ્યુત્પન્નૈ રચિતં ચ નૈવ વચનૈર્વક્રોક્તિશૂન્યં ચ યત્ ।
કાવ્યં તદ્ધ્વનિના સમન્વિતમિતિ પ્રીત્યા પ્રશંસઞ્જડો
નો વિદ્મોઽભિદધાતિ કિં સુમતિના પૃષ્ટઃ સ્વરૂપં ધ્વનેઃ ॥

ભાક્તમાહુસ્તમન્યે । અન્યે તં ધ્વનિસંજ્ઞિતમ્ કાવ્યત્માનં ગુણવૃત્તિરિત્યાહુઃ ।

યદ્યપિ ચ ધ્વનિશબ્દસંકીર્તનેન કાવ્યલક્ષણવિધાયિભિર્ગુણવૃત્તિ-રન્યો વા ન કશ્ચિત્પ્રકારઃ પ્રકાશિતઃ , તથાપિ અમુખ્યવૃત્ત્યા કાવ્યેષુ વ્યવહારં દર્શયતા ધ્વનિમાર્ગો મનાક્સ્પૃષ્ટોઽપિ ન લક્ષિત ઇતિ પરિકલ્પ્યૈવમુક્તમ્ —"ભાક્તમાહુસ્તમન્યે"ઇતિ ।

કેચિત્પુનર્લક્ષણકરણશાલીનબુદ્ધયો ધ્વનેસ્તત્ત્વં ગિરામગોચરમ્ સહૃદયહૃદયસંવેદ્યમેવ સમાખ્યાતવન્તઃ । તેનૈવંવિધાસુ વિમતિષુ સ્થિતાસુ સહૃદયમનઃપ્રીતયે તત્સ્વરૂપં બ્રૂમઃ ।

તસ્ય હિ ધ્વનેઃ સ્વરૂપં  સકલસત્કવિકાવ્યોપનિષદ્ભૂતમતિરમણીય-મણીયસીભિરપિ ચિરન્તનકાવ્યલક્ષણવિધાયિનાં બુદ્ધિભિરનુન્મીલિત-પૂર્વમ્ , અથ ચ રામાયણમહાભારતપ્રભૃતિનિ લક્ષ્યે સર્વત્ર પ્રસિદ્ધવ્યવહારં લક્ષયતાં સહૃદયાનામાનન્દો મનસિ લભતાં પ્રતિષ્ઠામિતિ પ્રકાશ્યતે ॥ ૧॥

તત્ર ધ્વનેરેવ લક્ષયિતુમારબ્ધસ્ય ભૂમિકાં રચયિતુમિદમુચ્યતે —

યોઽર્થઃ સહૃદયશ્લાઘ્યઃ કાવ્યાત્મેતિ વ્યવસ્થિતઃ ।
વાચ્યપ્રતીયમાનાખ્યૌ તસ્ય ભેદાવુભૌ સ્મૃતૌ ॥ ૨॥

કાવ્યસ્ય હિ લલિતોચિતસન્નિવેશચારુણઃ શરીરસ્યેવાત્મા સારરૂપતયા સ્થિતઃ સહૃદયશ્લાઘ્યો યોઽર્થસ્તસ્ય વાચ્યઃ પ્રતીયમાનશ્ચેતિ દ્વૌ ભેદૌ ।

તત્ર વાચ્યઃ પ્રસિદ્ધો યઃ પ્રકારૈરુપમાદિભિઃ ।
બહુધા વ્યાકૃતઃ સોઽન્યૈઃ —
કાવ્યલક્ષ્મવિધાયિભિઃ ।
— તતો નેહ પ્રતન્યતે ॥ ૩॥

કેવલમનૂદ્યતે પુનર્યથોપયોગમિતિ ॥ ૩॥

પ્રતીયમાનં પુનરન્યદેવ વસ્ત્વસ્તિ વાણીષુ મહાકવીનામ્ ।
યત્તત્પ્રસિદ્ધાવયવાતિરિક્તં વિભાતિ લાવણ્યમિવાંગનાસુ ॥ ૪॥

પ્રતીયમાનં પુનરન્યદેવ વાચ્યાદ્વસ્ત્વસ્તિ  વાણીષુ મહાકવીનામ્ । યત્તત્સહૃદયસુપ્રસિદ્ધં પ્રસિદ્ધેભ્યોઽલંકૃતેભ્યઃ પ્રતીતેભ્યો વાઽવયવેભ્યો વ્યતિરિક્તત્વેન પ્રકાશતે  લાવણ્યમિવાંગનાસુ । યથા હ્યંગનાસુ લાવણ્યં પૃથઙ્નિર્વર્ણ્યમાનં નિખિલાવયવવ્યતિરેકિ કિમપ્યન્યદેવ સહૃદયલોચનામૃતં તત્ત્વાન્તરં તદ્વદેવ સોઽર્થઃ ।

સ હ્યર્થો વાચ્યસામર્થ્યાક્ષિપ્તમ્ વસ્તુમાત્રમલંકારરસાદયશ્ચેત્યનેક પ્રભેદપ્રભિન્નૌ દર્શયિષ્યતે । સર્વેષુ ચ તેષુ પ્રકારેષુ તસ્ય વાચ્યાદન્યત્વમ્ । તથા હ્યાદ્યસ્તાવત્પ્રભેદો વાચ્યાદ્ દૂરમ્ વિભેદવાન્ । સ હિ કદાચિદ્વાચ્યે વિધિરૂપે પ્રતિષેધરૂપઃ । યથા —

ભ્રમ ધાર્મિક વિસ્રબ્ધઃ સ શુનકોઽદ્ય મારિતસ્તેન ।
ગોદાવરીનદીકૂલલતાગહનવાસિના દૃપ્તસિંહેન ॥

ક્વચિદ્વાચ્યે પ્રતિષેધરૂપે વિધિરૂપો યથા —

શ્વશ્રૂરત્ર શેતે અથવા નિમજ્જતિ અત્રાહં દિવસકં પ્રલોકય ।
મા પથિક રાત્ર્યન્ધઃ શય્યાયામાવયોઃ શયિષ્ઠાઃ ॥

ક્વચિદ્વાચ્યે વિધિરૂપેઽનુભયરૂપો યથા —

વ્રજ મમૈવૈકસ્યા ભવન્તુ નિઃશ્વાસરોદિતવ્યાનિ ।
મા તવાપિ તયા વિના દાક્ષિણ્યહતસ્ય જનિષત ॥

ક્વચિદ્વાચ્યે પ્રતિષેધરૂપેઽનુભયરૂપો યથા —

પ્રાર્થયે તાવત્પ્રસીદ નિવર્તસ્વ મુખશશિજ્યોત્સ્નાવિલુપ્તતમોનિવહે ।
અભિસારિકાણાં વિઘ્નં કરોષ્યન્યાસામપિ હતાશે ॥

ક્વચિદ્વાચ્યાદ્વિભિન્નવિષયત્વેન વ્યવસ્થાપિતો યથા —

કસ્ય વા ન ભવતિ રોષો દૃષ્ટ્વા પ્રિયાયાઃ સવ્રણમધરમ્ ।
સભ્રમરપદ્માઘ્રાણશીલે વારિતવામે સહસ્વેદાનીમ્ ॥

અન્યે ચૈવમ્પ્રકારા વાચ્યાદ્વિભેદિનઃ પ્રતીયમાનભેદાઃ સમ્ભવન્તિ । તેષાં દિઙ્માત્રમેતત્પ્રદર્શિતમ્ । દ્વિતીયોઽપિ પ્રભેદો વાચ્યાદ્વિભિન્નઃ સપ્રપઞ્ચમગ્રે દર્શયિષ્યતે ।

તૃતીયસ્તુ રસાદિલક્ષણઃ પ્રભેદો વાચ્યસામર્થ્યાક્ષિપ્તઃ પ્રકાશતે , ન તુ સાક્ષાચ્છબ્દવ્યાપારવિષય ઇતિ વાચ્યાદ્વિભિન્ન એવ । તથા હિ વાચ્યત્વં તસ્ય સ્વશબ્દનિવેદિતત્વેન વા સ્યાત્ । વિભાવાદિપ્રતિપાદનમુખેન વા । પુર્વસ્મિન્ પક્ષે સ્વશબ્દનિવેદિતત્વાભાવે રસાદીનામપ્રતીતિપ્રસંગઃ ।

ન ચ સર્વત્ર તેષાં સ્વશબ્દનિવેદિતત્વમ્ । યત્રાપ્યસ્તિ તત્ , તત્રાપિ વિશિશ્ટવિભાવાદિપ્રતિપાદનમુખેનૈવૈષાં પ્રતીતિઃ ।

સ્વશબ્દેન સા કેવલમનૂદ્યતે , ન તુ તત્કૃતા વિષયાન્તરે તથા તસ્યા અદર્શનાત્ ।

ન હિ કેવલશૃંગારાદિશબ્દમાત્રભાજિ વિભાવાદિપ્રતિપાદનરહિતે કાવ્યે મનાગપિ રસવત્ત્વપ્રતીતિરસ્તિ । યતશ્ચ સ્વાભિધાનમન્તરેણ કેવલેભ્યોઽપિ વિભાવાદિભ્યો વિશિશ્ટેભ્યો રસાદીનાં પ્રતીતિઃ । કેવલાચ્ચ સ્વાભિધાનાદપ્રતીતિઃ । તસ્માદન્વયવ્યતિરેકાભ્યામભિધેયસામર્થ્યા-ક્ષિપ્તત્વમેવ રસાદીનામ્ । ન ત્વભિધેયત્વં કથંચિત્ , ઇતિ તૃતીયોઽપિ પ્રભેદો વાચ્યાદ્વિભિન્ન એવેતિ સ્થિતમ્ । વાચ્યેન ત્વસ્ય સહેવ પ્રતીતિરિત્યગ્રે દર્શયિષ્યતે ।

કાવ્યસ્યાત્મા સ એવાર્થસ્તથા ચાદિકવેઃ પુરા ।
ક્રૌઞ્ચદ્વન્દ્વવિયોગોત્થઃ શોકઃ શ્લોકત્વમાગતઃ ॥ ૫॥

વિવિધવાચ્યવાચકરચનાપ્રપઞ્ચચારુણઃ કાવ્યસ્ય સ
એવાર્થઃ સારભૂતઃ । ચાદિકવેર્વાલ્મીકેઃ નિહતસહચરીવિરહકાતર-
ક્રૌઞ્ચાક્રન્દજનિતઃ શોક એવ શ્લોકતયા પરિણતઃ ।

શોકો હિ કરુણસ્થાયિભાવઃ । પ્રતીયમાનસ્ય ચાન્યભેદદર્શનેઽપિ
રસભાવમુખેનૈવોપલક્ષણં પ્રાધાન્યાત્ ।

સરસ્વતી સ્વાદુ તદર્થવસ્તુ નિઃષ્યન્દમાના મહતાં કવીનામ્ ।
અલોકસામાન્યમભિવ્યનક્તિ પરિસ્ફુરન્તમ્ પ્રતિભાવિશેષમ્ ॥ ૬॥

તત્ વસ્તુતત્ત્વં નિઃષ્યન્દમાના મહતાં કવીનાં ભારતી અલોકસામાન્યં
પ્રતિભાવિશેષં  પરિસ્ફુરન્તમભિવ્યનક્તિ । યેનાસ્મિન્નતિવિચિત્રકવિ-
પરમ્પરાવાહિનિ સંસારે કાલિદાસપ્રભૃતયો દ્વિત્રાઃ પઞ્ચષા વા
મહાકવય ઇતિ ગણ્યન્તે ।

ઇદં ચાપરં પ્રતીયમાનસ્યાર્થસ્ય સદ્ભાવસાધનં પ્રમાણમ્ —
શબ્દાર્થશાસનજ્ઞાનમાત્રેણૈવ ન વેદ્યતે ।
વેદ્યતે સ તુ કાવ્યાર્થતત્ત્વજ્ઞૈરેવ કેવલમ્ ॥ ૭॥

સોઽર્થો યસ્માત્કેવલં કાવ્યાર્થતત્ત્વજ્ઞૈરેવ  જ્ઞાયતે । યદિ ચ
વાચ્યરૂપ એવાસાવર્થઃ સ્યાત્તદ્વાચ્યવાચકરૂપપરિજ્ઞાનાદેવ
તત્પ્રતીતિઃ સ્યાત્ । અથ ચ વાચ્યવાચકલક્ષણમાત્રકૃતશ્રમાણાં
કાવ્યતત્ત્વાર્થભાવનાવિમુખાનાં સ્વરશ્રુત્યાદિલક્ષણમિવાઽપ્ર-
ગીતાનાં ગાન્ધર્વલક્ષણવિદામગોચર એવાસાવર્થઃ ।

એવં વાચ્યવ્યતિરેકિણો વ્યઙ્ગ્યસ્ય સદ્ભાવં પ્રતિપાદ્ય પ્રાધાન્યં
તસ્યૈવેતિ દર્શયતિ —

સોઽર્થસ્તદ્વ્યક્તિસામર્થ્યયોગી શબ્દશ્ચ કશ્ચન ।
યત્નતઃ પ્રત્યભિજ્ઞેયૌ તૌ શબ્દાર્થૌ મહાકવેઃ ॥ ૮॥

વ્યઙ્ગ્યોઽર્થસ્તદ્વ્યક્તિસામર્થ્યયોગી શબ્દશ્ચ કશ્ચન , ન શબ્દ-
માત્રમ્ । તાવેવ શબ્દાર્થૌ મહાકવેઃ પ્રત્યભિજ્ઞેયૌ ।વ્યઙ્ગ્યવ્યઞ્જ-
કાભ્યામેવ સુપ્રયુક્તાભ્યાં મહાકવિત્વલાભો મહાકવીનાં , ન
વાચ્યવાચકરચનામાત્રેણ ।

ઇદાનીં વ્યઙ્ગ્યવ્યઞ્જકયોઃ પ્રાધાન્યેઽપિ યદ્વાચ્યવાચકાવેવ
પ્રથમમુપાદદતે કવયસ્તદપિ યુક્તમેવેત્યાહ —

આલોકાર્થી યથા દીપશિખાયાં યત્નવાઞ્જનઃ ।
તદુપાયતયા તદ્વદર્થે વાચ્યે તદાદૃતઃ ॥ ૯॥

યથા હ્યાલોકાર્થી સન્નપિ દીપશિખાયાં યત્નવાઞ્જનો ભવતિ તદુ-
પાયતયા । ન હિ દીપશિખામન્તરેણાલોકઃ સમ્ભવતિ । તદ્વ્યઙ્ગ્યમર્થં
પ્રત્યાદૃતો જનો વાચ્યેઽર્થે યત્નવાન્ ભવતિ । અનેન પ્રતિપાદકસ્ય
કવેર્વ્યઙ્ગ્યમર્થં પ્રતિ વ્યાપારો દર્શિતઃ ॥ ૯॥

પ્રતિપાદ્યસ્યાપિ તં દર્શયિતુમાહ —
યથા પદાર્થદ્વારેણ વાક્યાર્થઃ સમ્પ્રતીયતે ।
વાચ્યાર્થપૂર્વિકા તદ્વત્પ્રતિપત્તસ્ય વસ્તુનઃ ॥ ૧૦॥

યથા હિ પદાર્થદ્વારેણ વાક્યાર્થાવગમસ્તથા વાચ્યાર્થપ્રતીતિ-
પૂર્વિકા વ્યઙ્ગ્યસ્યાર્થસ્ય પ્રતિપત્તિઃ ॥ ૧૦॥

ઇદાનીં વાચ્યાર્થપ્રતીતિપૂર્વકત્વેઽપિ તત્પ્રતીતેર્વ્યઙ્ગ્યસ્યાર્થસ્ય
પ્રાધાન્યં યથા ન વ્યાલુપ્યતે તથા દર્શયતિ —

સ્વસામર્થ્યવશેનૈવ વાક્યાર્થં પ્રતિપાદયન્ ।
યથા વ્યાપારનિષ્પત્તૌ પદાર્થો ન વિભાવ્યતે ॥ ૧૧॥

યથા સ્વસામર્થ્યવશેનૈવ વાક્યાર્થં પ્રકાશયન્નપિ પદાર્થો
વ્યાપારનિષ્પત્તૌ ન ભાવ્યતે વિભક્તતયા ॥ ૧૧॥

તદ્વત્સચેતસાં સોઽર્થો વાચ્યાર્થવિમુખાત્મનામ્ ।
બુદ્ધૌ તત્ત્વાર્થદર્શિન્યાં ઝટિત્યેવાવભાસતે ॥ ૧૨॥

એવં વાચ્યવ્યતિરેકિણો વ્યઙ્ગ્યસ્યાર્થસ્ય સદ્ભાવં પ્રતિપાદ્ય પ્રકૃત
ઉપયોજયન્નાહ —

યત્રાર્થઃ શબ્દો વા તમર્થમુપસર્જનીકૃતસ્વાર્થૌ ।
વ્યઙ્ક્તઃ કાવ્યવિશેષઃ સ ધ્વનિરિતિ સૂરિભિઃ કથિતઃ ॥ ૧૩॥

યત્રાર્થો વાચ્યવિશેષઃ વાચકવિશેષઃ શબ્દો વા તમર્થં વ્યઙ્ક્તઃ ,
સ કાવ્યવિશેષો ધ્વનિરિતિ ।

અનેન વાચ્યવાચકચારુત્વહેતુભ્ય ઉપમાદિભ્યોઽનુપ્રાસાદિભ્યશ્ચ
વિભક્ત એવ ધ્વનેર્વિષય ઇતિ દર્શિતમ્ । યદપ્યુક્તમ્ —
“પ્રસિદ્ધપ્રસ્થાનાતિક્રમિણો માર્ગસ્ય કાવ્યહાનેર્ધ્વનિર્નાસ્તિ”ઇતિ ,

તદપ્યયુક્તમ્ । યતો લક્ષણકૃતામેવ સ કેવલં ન પ્રસિદ્ધઃ , લક્ષ્યે તુ પરીક્ષ્યમાણે સ એવ સહૃદયહૃદયાહ્લાદકારિ કાવ્યતત્ત્વમ્ । તતોઽન્યચ્ચિત્રમેવેત્યગ્રે દર્શયિષ્યામઃ ।

યદપ્યુક્તમ્ —“કામનીયકમનતિવર્તમાનસ્ય તસ્યોક્તાલંકારાદિ-પ્રકારેષ્વન્તર્ભાવઃ“ ઇતિ , તદપ્યસમીચીનમ્ ; વાચ્યવાચકમાત્રા-શ્રયિણિ પ્રસ્થાને વ્યઙ્ગ્યવ્યઞ્જકસમાશ્રયેણ વ્યવસ્થિતસ્ય ધ્વનેઃ કથમન્તર્ભાવઃ , વાચ્યવાચકચારુત્વહેતવો હિ તસ્યાંગભૂતાઃ , સ ત્વંગિરૂપ એવેતિ પ્રતિપાદયિષ્યમાણત્વાત્ ।

પરિકરશ્લોકાશ્ચાત્ર —

વ્યઙ્ગ્યવ્યઞ્જકસમ્બન્ધનિબન્ધનતયા ધ્વનેઃ ।
વાચ્યવાચકચારુત્વહેત્વન્તઃપાતિતા કુતઃ ॥

નનુ યત્ર પ્રતીયમાનસ્યાર્થસ્ય વૈશદ્યેનાપ્રતીતિઃ સ નામ મા ભૂદ્ ધ્વનેર્વિષયઃ । યત્ર તુ પ્રતીતિરસ્તિ , યથા —

સમાસોક્ત્યાક્ષેપાનુક્તનિમિત્તવિશેષોક્તિપર્યાયોક્તાપહ્નુતિદીપકસંકરા-લંકારાદૌ , તત્ર ધ્વનેરન્તર્ભાવો ભવિષ્યતીત્યાદિ નિરાકર્તુમભિહિતમ્ —“ઉપસર્જનીકૃતસ્વાર્થૌ“ ઇતિ ।

અર્થો ગુણીકૃતાત્મા , ગુણીકૃતાભિધેયઃ શબ્દો વા યત્રાર્થાન્તર-મભિવ્યનક્તિ સ ધ્વનિરિતિ । તેષુ કથં તસ્યાન્તર્ભાવઃ । વ્યઙ્ગ્યપ્રાધાન્યે હિ ધ્વનિઃ । ન ચૈતત્સમાસોક્ત્યાદિષ્વસ્તિ ।

સમાસોક્તૌ તાવત્ —
ઉપોઢરાગેણ વિલોલતારકં તથા ગૃહીતં શશિના નિશામુખમ્ ।
યથા સમસ્તં તિમિરાંશુકં તયા પુરોઽપિ રાગાદ્ગલિતં ન લક્ષિતમ્ ॥

ઇત્યાદૌ વ્યઙ્ગ્યેનાનુગતં વાચ્યમેવ પ્રાધાન્યેન પ્રતીયતે સમારોપિત-નાયિકાનાયકવ્યવહારયોર્નિશાશશિનોરેવ વાક્યાર્થત્વાત્ ।

આક્ષેપેઽપિ વ્યઙ્ગ્યવિશેષાક્ષેપિણોઽપિ વાચ્યસ્યૈવ ચારુત્વં પ્રાધાન્યેન વાક્યાર્થ આક્ષેપોક્તિસામર્થ્યાદેવ જ્ઞાયતે । તથાહિ – તત્ર શબ્દોપારૂઢો વિશેષાભિધાનેચ્છયા પ્રતિષેધરૂપો ય આક્ષેપઃ સ એવ વ્યઙ્ગ્યવિશેષ-માક્ષિપન્મુખ્યં કાવ્યશરીરમ્ ।

ચારુત્વોત્કર્ષનિબન્ધના હિ વાચ્યવ્યઙ્ગ્યયોઃ પ્રાધાન્યવિવક્ષા ।

યથા —
અનુરાગવતી સન્ધ્યા દિવસસ્તત્પુરસ્સરઃ ।
અહો દૈવગતિઃ કીદૃક્તથાપિ ન સમાગમઃ ॥

અત્ર સત્યામપિ વ્યઙ્ગ્યપ્રતીતૌ વાચ્યસ્યૈવ ચારુત્વમુત્કર્ષવદિતિ તસ્યૈવ પ્રાધાન્યવિવક્ષા ।

યથા ચ દીપકાપહ્નુત્યાદૌ વ્યઙ્ગ્યત્વેનોપમાયાઃ પ્રતીતાવપિ પ્રાધાન્યેના-વિવક્ષિતત્વાન્ન તયા વ્યપદેશસ્તદ્વદત્રાપિ દ્રષ્ટવ્યમ્ ।

અનુક્તનિમિત્તાયામપિ વિશેષોક્તૌ —
આહૂતોઽપિ સહાયૈરોમિત્યુક્ત્વા વિમુક્તનિદ્રોઽપિ ।
ગન્તુમના અપિ પથિકઃ સઙ્કોચં નૈવ શિથિલયતિ ॥

ઇત્યાદૌ વ્યઙ્ગ્યસ્ય પ્રકરણસામર્થ્યાત્પ્રતીતિમાત્રં ન તુ તત્પ્રતીતિનિમિત્તા કાચિચ્ચારુત્વનિષ્પત્તિરિતિ ન પ્રાધાન્યમ્ । પર્યાયોક્તેઽપિ યદિ પ્રાધાન્યેન વ્યઙ્ગ્યત્વં તદ્ભવતુ નામ તસ્ય ધ્વનાવન્તર્ભાવઃ । ન તુ ધ્વનેસ્તત્રાન્ત-ર્ભાવઃ । તસ્ય મહાવિષયત્વેનાઙ્ગિત્વેન ચ પ્રતિપાદયિષ્યમાણત્વાત્ । ન પુનઃ પર્યાયો ભામહોદાહૃતસદૃશે વ્યઙ્ગ્યસ્યૈવ પ્રાધાન્યમ્ । વાચ્યસ્ય તત્રોપસર્જનાભાવેનાવિવક્ષિતત્વાત્ ।

અપહ્નુતિદીપકયોઃ પુનર્વાચ્યસ્ય પ્રાધાન્યં વ્યઙ્ગ્યસ્ય ચાનુયાયિત્વં પ્રસિદ્ધમેવ ।

સંકરાલંકારેઽપિ યદલંકારોઽલંકારાન્તરચ્છાયામનુગૃહ્ણાતિ , તદા  વ્યઙ્ગ્યસ્ય પ્રાધાન્યેનાવિવક્ષિતત્વાન્ન ધ્વનિવિષયત્વમ્ ।

અલંકારદ્વયસમ્ભાવનાયાં તુ વાચ્યવ્યઙ્ગ્યયોઃ સમં પ્રાધાન્યમ્ । અથ વાચ્યોપસર્જનીભાવેન વ્યઙ્ગ્યસ્ય તત્રાવસ્થાનં તદા સોઽપિ ધ્વનિવિષયોઽસ્તુ , ન તુ સ એવ ધ્વનિરિતિ વક્તું શક્યમ્ । પર્યાયોક્ત-નિર્દિષ્ટન્યાયાત્ ।

અપિ ચ સંકરાલંકારેઽપિ ચ ક્વચિત્ સંકરોક્તિરેવ ધ્વનિસમ્ભાવનાં નિરાકરોતિ ।

અપ્રસ્તુતપ્રશંસાયામપિ યદા સામાન્યવિશેષભાવાન્નિમિત્તનિમિત્તિ-ભાવાદ્વા અભિધીયમાનસ્યાપ્રસ્તુતસ્ય પ્રતીયમાનેન પ્રસ્તુતેનાભિ-સમ્બન્ધસ્તદાભિધીયમાનપ્રતીયમાનયોઃ સમમેવ પ્રાધાન્યમ્ ।

યદા તાવત્સામાન્યસ્યાપ્રસ્તુતસ્યાભિધીયમાનસ્ય પ્રાકરણિકેન વિશેષેણ પ્રતીયમાનેન સમ્બન્ધસ્તદા વિશેષપ્રતીતૌ સત્યામપિ પ્રાધાન્યેન તત્સામાન્યેનાવિનાભાવાત્સામાન્યસ્યાપિ પ્રાધાન્યમ્ । યદાપિ વિશેષસ્ય સામાન્યનિષ્ઠત્વં તદાપિ સામાન્યસ્ય પ્રાધાન્યે સામાન્યે સર્વવિશેષાણામન્તર્ભાવાદ્વિશેષસ્યાપિ પ્રાધાન્યમ્ ।

નિમિત્તનિમિત્તિભાવે ચાયમેવ ન્યાયઃ ।

યદા તુ સારૂપ્યમાત્રવશેનાપ્રસ્તુતપ્રશંસાયામપ્રકૃતપ્રકૃતયોઃ સમ્બન્ધસ્તદાપ્યપ્રસ્તુતસ્ય સરૂપસ્યાભિધીયમાનસ્ય પ્રાધાન્યેના-વિવક્ષાયાં ધ્વનાવેવાન્તઃપાતઃ । ઇતરથા ત્વલંકારાન્તરમેવ । તદયમત્ર સઙ્ક્ષેપઃ —

વ્યઙ્ગ્યસ્ય યત્રાપ્રાધાન્યં વાચ્યમાત્રાનુયાયિનઃ ।
સમાસોક્ત્યાદયસ્તત્ર વાચ્યાલઙ્કૃતયઃ સ્ફુટાઃ ॥

વ્યઙ્ગ્યસ્ય પ્રતિભામાત્રે વાચ્યાર્થાનુગમેઽપિ વા ।
ન ધ્વનિર્યત્ર વા તસ્ય પ્રાધાન્યં ન પ્રતીયતે ॥

તત્પરાવેવ શબ્દાર્થૌ યત્ર વ્યઙ્ગ્યં પ્રતિ સ્થિતૌ ।
ધ્વનેઃ સ એવ વિષયો મન્તવ્યઃ સંકરોજ્ઝિતઃ ॥

તસ્માન્ન ધ્વનેરન્યત્રાન્તર્ભાવઃ । ઇતશ્ચ નાન્તર્ભાવઃ ; યતઃ કાવ્યવિશેષોઽંગી ધ્વનિરિતિ કથિતઃ । તસ્ય પુનરંગાનિ — અલંકારા ગુણા વૃત્તયશ્ચેતિ પ્રતિપાદયિષ્યન્તે । ન ચાવયવ એવ પૃથગ્ભૂતોઽવયવીતિ પ્રસિદ્ધઃ । અપૃથગ્ભાવે તુ તદંગત્વં તસ્ય । ન તુ તત્ત્વમેવ । યત્રાપિ વા તત્ત્વં તત્રાપિ ધ્વનેર્મહાવિષય-ત્વાન્ન તન્નિષ્ઠત્વમેવ ।“ સૂરિભિઃ કથિત“ ઇતિ વિદ્વદુપજ્ઞેયમુક્તિઃ , ન તુ યથાકથઞ્ચિત્પ્રવૃત્તેતિ પ્રતિપાદ્યતે । પ્રથમે હિ વિદ્વાંસો વૈયાકરણાઃ , વ્યાકરણમૂલત્વાત્સર્વવિદ્યાનામ્ । તે ચ શ્રૂયમાણેષુ વર્ણેષુ ધ્વનિરિતિ વ્યવહરન્તિ ।

તથૈવાન્યૈસ્તન્મતાનુસારિભિઃ સૂરિભિઃ કાવ્યતત્ત્વાર્થદર્શિભિ-ર્વાચ્યવાચકસમ્મિશ્રઃ શબ્દાત્મા કાવ્યમિતિ વ્યપદેશ્યો વ્યઞ્જક-ત્વસામ્યાદ્ધ્વનિરિત્યુક્તઃ । ન ચૈવંવિધસ્ય ધ્વનેર્વક્ષ્યમાણપ્રભેદ-તદ્ભેદસંકલનયા મહાવિષયસ્ય યત્પ્રકાશનં તદપ્રસિદ્ધાલંકાર-વિશેષમાત્રપ્રતિપાદનેન તુલ્યમિતિ તદ્ભાવિતચેતસાં યુક્ત એવ

સંરમ્ભઃ । ન ચ તેષુ કથઞ્ચિદીર્ષ્યયા કલુષિતશેમુષીકત્વ-
માવિષ્કરણીયમ્ । તદેવં ધ્વનેસ્તાવદભાવવાદિનઃ પ્રત્યુક્તાઃ ।

અસ્તિ ધ્વનિઃ । સ ચાસાવવિવક્ષિતવાચ્યો વિવક્ષિતાન્યપરવાચ્યશ્ચેતિ
દ્વિવિધઃ સામાન્યેન ।

તત્રાદ્યસ્યોદાહરણમ્ —
સુવર્ણપુષ્પાં પૃથિવીં ચિન્વન્તિ પુરુષાસ્ત્રયઃ ।
શૂરશ્ચ કૃતવિદ્યશ્ચ યશ્ચ જાનાતિ સેવિતુમ્ ॥

દ્વિતીયસ્યાપિ —
શિખરિણિ ક્વ નુ નામ કિયચ્ચિરં કિમભિધાનમસાવકરોત્તપઃ ।
તરુણિ યેન તવાધરપાટલં દશતિ બિમ્બફલં શુકશાવકઃ ॥ ૧૩॥

યદપ્યુક્તં ભક્તિર્ધ્વનિરિતિ , તત્પ્રતિસમાધીયતે —
ભક્ત્યા બિભર્તિ નૈકત્વમ્ રૂપભેદાદયં ધ્વનિઃ

અયમુક્તપ્રકારો ધ્વનિર્ભક્ત્યા નૈકત્વં બિભર્તિ ભિન્નરૂપત્વાત્ ।
વાચ્યવ્યતિરિક્તસ્યાર્થસ્ય વાચ્યવાચકાભ્યાં તાત્પર્યેણ પ્રકાશનં
યત્ર વ્યઙ્ગ્યપ્રાધાન્યે સ ધ્વનિઃ । ઉપચારમાત્રં તુ ભક્તિઃ ।

મા ચૈતત્સ્યાદ્ભક્તિર્લક્ષણં ધ્વનેરિત્યાહ —
અતિવ્યાપ્તેરથાવ્યાપ્તેર્ન ચાસૌ લક્ષ્યતે તયા ॥ ૧૪॥

નૈવ ભક્ત્યા ધ્વનિર્લક્ષ્યતે । કથમ્ ? અતિવ્યાપ્તેરવ્યાપ્તેશ્ચ ।
તત્રાતિવ્યાપ્તિર્ધ્વનિવ્યતિરિક્તેઽપિ વિષયે ભક્તેઃ સમ્ભવાત્ । યત્ર હિ
વ્યઙ્ગ્યકૃતં મહત્સૌષ્ઠવં નાસ્તિ તત્રાપ્યુપચરિતશબ્દવૃત્ત્યા
પ્રસિદ્ધ્યનુરોધપ્રવર્તિતવ્યવહારાઃ કવયો દૃશ્યન્તે । યથા —

પરિમ્લાનં પીનસ્તનજઘનસઙ્ગાદુભયત-
સ્તનોર્મધ્યસ્યાન્તઃ પરિમિલનમપ્રાપ્ય હરિતમ્ ।
ઇદં વ્યસ્તન્યાસં શ્લથભુજલતાક્ષેપવલનૈઃ
કૃશાઙ્ગ્યાઃ સન્તાપં વદતિ બિસિનીપત્રશયનમ્ ॥

તથા —
શતકૃત્વોઽવરુધ્યતે સહસ્રકૃત્વશ્ચુમ્બ્યતે ।
વિરમ્ય પુના રમ્યતે પ્રિયો જનો નાસ્તિ પુનરુક્તમ્ ॥

તથા —

કુપિતાઃ પ્રસન્ના અવરુદિતવદના વિહસન્ત્યઃ ।
યથા ગૃહીતાસ્તથા હૃદયં હરન્તિ સ્વૈરિણ્યો મહિલાઃ ॥

તથા —
ભાર્યાયાઃ પ્રહારો નવલતયા દત્તઃ પ્રિયેણ સ્તનપૃષ્ઠે ।
મૃદુકોઽપિ દુઃસહ ઇવ જાતો હૃદયે સપત્નીનામ્ ॥

તથા —
પરાર્થે યઃ પીડામનુભવતિ ભઙ્ગેઽપિ મધુરો
યદીયઃ સર્વેષામિહ ખલુ વિકારોઽપ્યભિમતઃ ।
ન સમ્પ્રાપ્તો વૃદ્ધિં યદિ સ ભૃશમક્ષેત્રપતિતઃ
કિમિક્ષોર્દોષોઽસૌ ન પુનરગુણાયા મરુભુવઃ ॥

ઇત્યત્રેક્ષુપક્ષેઽનુભવતિશબ્દઃ । ન ચૈવંવિધઃ કદાચિદપિ ધ્વનેર્વિષયઃ ।

યતઃ —
ઉક્ત્યન્તરેણાશક્યં યત્તચ્ચારુત્વં પ્રકાશયન્ ।
શબ્દો વ્યઞ્જકતાં બિભ્રદ્ ધ્વન્યુક્તેર્વિષયીભવેત્ ॥ ૧૫ ॥

અત્ર ચોદાહૃતે વિષયે નોક્ત્યન્તરાશક્યચારુત્વવ્યક્તિહેતુઃ શબ્દઃ । કિઞ્ચ —

રૂઢા યે વિષયેઽન્યત્ર શબ્દાઃ સ્વવિષયાદપિ ।
લાવણ્યાદ્યાઃ પ્રયુક્તાસ્તે ન ભવન્તિ પદં ધ્વનેઃ ॥ ૧૬ ॥

તેષુ ચોપચરિતશબ્દવૃત્તિરસ્તીતિ । તથાવિધે ચ વિષયે ક્વચિત્સમ્ભવન્નપિ ધ્વનિવ્યવહારઃ પ્રકારાન્તરેણ પ્રવર્તતે । ન તથાવિધશબ્દમુખેન ।

અપિ ચ —
મુખ્યાં વૃત્તિં પરિત્યજ્ય ગુણવૃત્ત્યાઽર્થદર્શનમ્ ।
યદુદ્દિશ્ય ફલં તત્ર શબ્દો નૈવ સ્ખલદ્ગતિઃ ॥ ૧૭ ॥

તત્ર હિ ચારુત્વાતિશયવિશિષ્ટાર્થપ્રકાશનલક્ષણે પ્રયોજને કર્તવ્યે યદિ શબ્દસ્યામુખ્યતા તદા તસ્ય પ્રયોગે દુષ્ટતૈવ સ્યાત્ । ન ચૈવમ્ ; તસ્માત્ —

વાચકત્વાશ્રયેણૈવ ગુણવૃત્તિર્વ્યવસ્થિતા ।

વ્યઞ્જકત્વૈકમૂલસ્ય ધ્વનેઃ સ્યાલ્લક્ષણં કથમ્ ॥ ૧૮॥

તસ્માદન્યો ધ્વનિરન્યા ચ ગુણવૃત્તિઃ । અવ્યાપ્તિરપ્યસ્ય લક્ષણસ્ય । ન હિ ધ્વનિપ્રભેદો વિવક્ષિતાન્યપરવાચ્યલક્ષણઃ । અન્યે ચ બહવઃ પ્રકારા ભક્ત્યા વ્યાપ્યન્તઃ ; તસ્માદ્ભક્તિરલક્ષણમ્ ॥ ૧૮॥

કસ્યચિદ્ ધ્વનિભેદસ્ય સા તુ સ્યાદુપલક્ષણમ્ ।

સા પુનર્ભક્તિર્વક્ષ્યમાણપ્રભેદમધ્યાદન્યતમસ્ય ભેદસ્ય યદિ નામોપલક્ષણતયા સમ્ભાવ્યેત ; યદિ ચ ગુણવૃત્ત્યૈવ ધ્વનિર્લક્ષ્યત ઇત્યુચ્યતે તદભિધાવ્યાપારેણ તદિતરોઽલંકારવર્ગઃ સમગ્ર એવ લક્ષ્યત ઇતિ પ્રત્યેકમલંકારાણાં લક્ષણકરણવૈયર્થ્યપ્રસઙ્ગઃ । કિં ચ

લક્ષણેઽન્યૈઃ કૃતે ચાસ્ય પક્ષસંસિદ્ધિરેવ નઃ ॥ ૧૯॥

કૃતેઽપિ વા પૂર્વમેવાન્યૈર્ધ્વનિલક્ષણે પક્ષસંસિદ્ધિરેવ નઃ ; યસ્માદ્ધ્વનિરસ્તીતિ નઃ પક્ષઃ । સ ચ પ્રાગેવ સંસિદ્ધ ઇત્યયત્નસમ્પન્નસમીહિતાર્થાઃ સંવૃત્તાઃ સ્મઃ । યેઽપિ સહૃદયહૃદયસંવેદ્યમનાખ્યેયમેવ ધ્વનેરાત્માનમામ્નાસિષુસ્તેઽપિ ન પરીક્ષ્ય વાદિનઃ । યત ઉક્તયા નીત્યા વક્ષ્યમાણયા ચ ધ્વનેઃ સામાન્યવિશેષલક્ષણે પ્રતિપાદિતેઽપિ યદ્યનાખ્યેયત્વં તત્સર્વેષામેવ વસ્તૂનાં તત્પ્રસક્તમ્ । યદિ પુનર્ધ્વનેરતિશયોક્ત્યાનયા કાવ્યાન્તરાતિશાયિ તૈઃ સ્વરૂપમાખ્યાયતે તત્તેઽપિ યુક્તાભિધાયિન એવ ॥

ઇતિ શ્રીરાજાનકાનન્દવર્ધનાચાર્યવિરચિતે ધ્વન્યાલોકે પ્રથમઃ ઉદ્યોતઃ ॥

Encoded by Rajani Arjun Shankar

*DhvanyAlokah Udyotah 1*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*